Roll No..........................
Signature of Invigilator .........

Paper Code

BV-503

# पतंजलि विश्वविद्यालय

## University of Patanjali
## Examination Jan. – Feb. -2022

### बी. ए. व्याकरण, पंचमसत्रम्
### व्याकरणम्, तृतीयपत्रम्
### संस्कृतसाहित्यम्

समयः - होरात्रयम् पूर्णाङ्काः ७०

---

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

### (खण्ड -क)

प्र01. कारकसमास शब्दव्युत्पतिपदार्थदिपुरस्सरम् पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। ( 5 x2=10)

1. सोऽश्रुगद्गदमगदत् - श्रूयतां महाभाग विदर्भोनाम जनपदः तस्मिन् भोजवंशभूषणम्, अंशावतार इव धर्मस्य, अतिसत्वः, सत्यवादी, वदान्यः, विनीतः विनेता प्रजानाम्, रञ्जितभृत्यः, कीर्तिमान्, उदग्रः, बुद्धिमूर्तिभ्यामुत्थानशील शास्त्रप्रमाणः शक्यभव्यकल्पारम्भी, सम्भावयिता बुधान्।।
2. एतदाकर्ण्यस्थान एव गुरुभिरनुशिष्टम्। तथा क्रियते इत्यन्तः पुरमविशत्। तां च वार्तां प्रमदा सन्निधौ प्रसङ्गेनोदीरितामुपनिशम्य समीपोपविशष्टश्चित्तानुवृत्तिकुशलः प्रसादक्तो गीतनृत्यवाद्यादिष्वबाह्यो बाह्यनारीपरायणः पटुरयन्त्रितमुखो बहुभङ्गिविशारद परमर्मान्वेषणपरः परिहासयिता परिवादरुचिः पैशुन्यपण्डितः सचिवमण्डलादपि उत्कोचहारी सकलदुर्नयोपाध्यायः कामतन्त्रकर्णधारः कुमारसेवको विहारभद्रो नाम स्मितपूर्वं व्यज्ञापयत्।।
3. उत्थितेन च राजा क्षालिताक्षालिते मुखे मुष्टिमर्धमुष्टिं वाऽभ्यन्तरीकृत्य कृत्स्नमायव्ययजातमहूनः प्रथमेऽष्टमे भागे श्रोतव्यम्। श्रृण्वत एव अस्य द्विगुणमपहरन्ति तेऽध्यक्षधूर्ताः। चत्वारिंशतं चाणक्योपदिष्टानाहरणोपायान् सहस्रधात्मबुद्ध्यैव ते विकल्पयितारः। द्वितीयेऽन्योऽन्यं विवदमानानां जनानामाक्रोशाद्दह्यमानकर्णः कष्टं जीवति।।

प्र02. पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। ( 5 x2 =10)

1. महाकवेः दण्डिनः कविपरिचयं प्रस्तूयताम्।
2. पुण्यवर्णो गुणानां वर्णनं क्रियताम्।
3. विहारभद्रस्य चरित्रस्य चित्रणं क्रियताम्।

प्र03. पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। ( 2.5x2 =05)

1. "दण्डिनः पदलालित्यं" वर्ण्यताम्।
2. विश्रुतस्य चरित्र चित्रणं क्रियताम्।
3. विश्रुतचरितस्य कथासारं वर्ण्यताम्।

## ( खण्ड -ख)

प्र01. पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। ( सप्रसङ्गव्याख्या ) ( 5 x2 =10)

1. अनन्तवीर्यः कमलायताक्षः सुरेन्द्रनाथोऽसुरवीर्यहन्ता।

   त्रिलोककेतुर्जगतश्च कर्ता भर्ता जनानां पुरुषः पुराणः।।

2. विन्ध्यमन्दरसारोऽयं बालः पद्मदलेक्षणः।

   गर्भे मया धृतः श्रीमानहो धैर्य हि योषितः।।

3. षण्णां सुतानां समुपेत्य नाशं वहन्निदं शोककृशं शरीरम्।
   आहूयमानोऽकरूणेन राज्ञा गच्छाम्यहं भृत्य इवास्वतन्त्रः।।

प्र02. पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। ( पात्रपरिचयः ) ( 2.5 x2 =5)

1. वासुदेवः।
2. दामोदरः।
3. राजा।

प्र03. पृष्टेषु त्रिषु द्वयोः समाधानं कुरु। ( अंकसारः ) ( 2.5 x2 =5)

1. प्रथमः।
2. द्वितीयः।
3. चतुर्थः।

## ( खण्ड -ग)

प्र01. पृष्टेषु सप्तसु सूत्रेषु पञ्चानां समाधानं कुरु । ( 5 x5 =25)

1. वैदर्भीरीतिः - स्वरूपोदाहरणम्।
2. गौडीरीतिः - स्वरूपोदाहरणम्।

❖ अलंकाराणां लक्षणम् उदाहरणं सङ्गतिः।

3. यमकम्।
4. श्लेषः।
5. स्वाभावोक्तिः।
6. व्याजस्तुतिः।
7. तुल्ययोगिता।

---------------x---------------